# ॥ वाल्मीकि रामायण॥

## ५ सुन्दरकाण्ड

### अध्याय १३

स वीक्षमाणस्तत्रस्थो मार्गमाणश्च मैथिलीम् ।
अवेक्षमाणश्च महीं सर्वां तामन्ववैक्षत ॥१॥

सन्तान कलताभिश्च पादपैरुपशोभिताम् ।
दिव्यगन्धरसोपेतां सर्वतः समलङ्कृताम् ॥२॥

तां स नन्दनसङ्काशां मृगपक्षिभिरावृताम् ।
हर्म्यप्रासादसम्बाधां कोकिलाकुलनिःस्वनाम् ॥३॥

काञ्चनोत्पलपद्माभिर्वापीभिरुपशोभिताम् ।
बह्वासनकुथोपेतां बहुभूमिगृहायुताम् ॥४॥

सर्वर्तुकुसुमै रम्यैः फलवद्भिश्च पादपैः ।
पुष्पितानामशोकानां श्रिया सूर्योदयप्रभाम् ॥५॥

प्रदीप्तामिव तत्रस्थो मारुतिः समुदैक्षत ।
निष्पत्रशाखां विहगैः क्रियमाणामिवासकृत् ।
विनिष्पतद्भिः शतशश्चित्रैः पुष्पावतंसकैः ॥६॥

आमूलपुष्पनिचितैरशोकैः शोकनाशनैः ।
पुष्पभारातिभारैश्च स्पृशद्भिरिव मेदिनीम् ॥७॥

कर्णिकारैः कुसुमितैः किंशुकैश्च सुपुष्पितैः ।
स देशः प्रभया तेषां प्रदीप्त इव सर्वतः ॥८॥

पुंनागाः सप्तपर्णाश्च चम्पकोद्दालकास्तथा ।
विवृद्धमूला बहवः शोभन्ते स्म सुपुष्पिताः ॥९॥

शातकुम्भनिभाः के चित्के चिदग्निशिखोपमाः ।
नीलाञ्जननिभाः के चित्तत्राशोकाः सहस्रशः ॥१०॥

नन्दनं विविधोद्यानं चित्रं चैत्ररथं यथा ।
अतिवृत्तमिवाचिन्त्यं दिव्यं रम्यं श्रिया वृतम् ॥११॥

द्वितीयमिव चाकाशं पुष्पज्योतिर्गणायुतम् ।
पुष्परत्नशतैश्चित्रं पञ्चमं सागरं यथा ॥१२॥

सर्वर्तुपुष्पैर्निचितं पादपैर्मधुगन्धिभिः ।
नानानिनादैरुद्यानं रम्यं मृगगणैर्द्विजैः ॥१३॥

अनेकगन्धप्रवहं पुण्यगन्धं मनोरमम् ।
शैलेन्द्रमिव गन्धाढ्यं द्वितीयं गन्धमादनम् ॥१४॥

अशोकवनिकायां तु तस्यां वानरपुङ्गवः ।
स ददर्शाविदूरस्थं चैत्यप्रासादमूर्जितम् ॥१५॥

मध्ये स्तम्भसहस्रेण स्थितं कैलासपाण्डुरम् ।
प्रवालकृतसोपानं तप्तकाञ्चनवेदिकम् ॥१६॥

मुष्णन्तमिव चक्षूंषि द्योतमानमिव श्रिया ।
विमलं प्रांशुभावत्वादुल्लिखन्तमिवाम्बरम् ॥१७॥

ततो मलिनसंवीतां राक्षसीभिः समावृताम् ।
उपवासकृशां दीनां निःश्वसान्तीं पुनः पुनः ।
ददर्श शुक्लपक्षादौ चन्द्ररेखामिवामलाम् ॥१८॥

मन्दप्रख्यायमानेन रूपेण रुचिरप्रभाम् ।
पिनद्धां धूमजालेन शिखामिव विभावसोः ॥१९॥

पीतेनैकेन संवीतां क्लिष्टेनोत्तमवाससा ।
सपङ्कामनलङ्कारां विपद्मामिव पद्मिनीम् ॥२०॥

व्रीडितां दुःखसन्तप्तां परिम्लानां तपस्विनीम् ।
ग्रहेणाङ्गारकेणैव पीडितामिव रोहिणीम् ॥२१॥

अश्रुपूर्णमुखीं दीनां कृशामननशेन च ।
शोकध्यानपरां दीनां नित्यं दुःखपरायणाम् ॥२२॥

प्रियं जनमपश्यन्तीं पश्यन्तीं राक्षसीगणम् ।
स्वगणेन मृगीं हीनां श्वगणाभिवृताम् इव ॥२३॥

नीलनागाभया वेण्या जघनं गतयैकया ।
सुखार्हां दुःखसन्तप्तां व्यसनानामकोदिवाम् ॥२४॥

तां समीक्ष्य विशालाक्षीमधिकं मलिनां कृशाम् ।
तर्कयामास सीतेति कारणैरुपपादिभिः ॥२५॥

ह्रियमाणा तदा तेन रक्षसा कामरूपिणा ।
यथारूपा हि दृष्टा वै तथारूपेयमङ्गना ॥ २६॥

पूर्णचन्द्राननां सुभ्रूं चारुवृत्तपयोधराम् ।
कुर्वन्तीं प्रभया देवीं सर्वा वितिमिरा दिशः ॥ २७॥

तां नीलकेशीं बिम्बौष्ठीं सुमध्यां सुप्रतिष्ठिताम् ।
सीतां पद्मपलाशाक्षीं मन्मथस्य रतिं यथा ॥ २८॥

इष्टां सर्वस्य जगतः पूर्णचन्द्रप्रभाम् इव ।
भूमौ सुतनुमासीनां नियतामिव तापसीम् ॥ २९॥

निःश्वासबहुलां भीरुं भुजगेन्द्रवधूम् इव ।
शोकजालेन महता विततेन न राजतीम् ॥ ३०॥

संसक्तां धूमजालेन शिखामिव विभावसोः ।
तां स्मृतीमिव सन्दिग्धामृद्धिं निपतिताम् इव ॥ ३१॥

विहतामिव च श्रद्धामाशां प्रतिहताम् इव ।
सोपसर्गां यथा सिद्धिं बुद्धिं सकलुषाम् इव ॥ ३२॥

अभूतेनापवादेन कीर्तिं निपतिताम् इव ।
रामोपरोधव्यथितां रक्षोहरणकर्शिताम् ॥ ३३॥

अबलां मृगशावाक्षीं वीक्षमाणां ततस्ततः ।
बाष्पाम्बुप्रतिपूर्णेन कृष्णवक्त्राक्षिपक्ष्मणा ।
वदनेनाप्रसन्नेन निःश्वसन्तीं पुनः पुनः ॥ ३४॥

मलपङ्कधरां दीनां मण्डनार्हाममण्डिताम् ।
प्रभां नक्षत्रराजस्य कालमेघैरिवावृताम् ॥ ३५॥

तस्य सन्दिदिहे बुद्धिर्मुहुः सीतां निरीक्ष्य तु ।
आम्नायानामयोगेन विद्यां प्रशिथिलाम् इव ॥ ३६॥

दुःखेन बुबुधे सीतां हनुमाननलङ्कृताम् ।
संस्कारेण यथाहीनां वाचमर्थान्तरं गताम् ॥ ३७॥

तां समीक्ष्य विशालाक्षीं राजपुत्रीमनिन्दिताम् ।
तर्कयामास सीतेति कारणैरुपपादयन् ॥ ३८॥

वैदेह्या यानि चाङ्गेषु तदा रामोऽन्वकीर्तयत् ।
तान्याभरणजालानि गात्रशोभीन्यलक्षयत् ॥ ३९॥

सुकृतौ कर्णवेष्टौ च श्वदंष्ट्रौ च सुसंस्थितौ ।
मणिविद्रुमचित्राणि हस्तेष्वाभरणानि च ॥ ४०॥

श्यामानि चिरयुक्तत्वात्तथा संस्थानवन्ति च ।
तान्येवैतानि मन्येऽहं यानि रामोऽन्वकीर्तयत् ॥ ४१॥

तत्र यान्यवहीनानि तान्यहं नोपलक्षये ।
यान्यस्या नावहीनानि तानीमानि न संशयः ॥ ४२॥

पीतं कनकपट्टाभं स्रस्तं तद्वसनं शुभम् ।
उत्तरीयं नगासक्तं तदा दृष्टं प्लवङ्गमैः ॥ ४३॥

भूषणानि च मुख्यानि दृष्टानि धरणीतले ।
अनयैवापविद्धानि स्वनवन्ति महान्ति च ॥ ४४॥

इदं चिरगृहीतत्वाद्वसनं क्लिष्टवत्तरम् ।
तथा हि नूनं तद्वर्णं तथा श्रीमद्यथेतरत् ॥ ४५॥

इयं कनकवर्णाङ्गी रामस्य महिषी प्रिया ।
प्रनष्टापि सती यस्य मनसो न प्रणश्यति ॥ ४६॥

इयं सा यत्कृते रामश्चतुर्भिः परितप्यते ।
कारुण्येनानृशंस्येन शोकेन मदनेन च ॥ ४७॥

स्त्री प्रनष्टेति कारुण्यादाश्रितेत्यानृशंस्यतः ।
पत्नी नष्टेति शोकेन प्रियेति मदनेन च ॥ ४८॥

अस्या देव्या यथा रूपमङ्गप्रत्यङ्गसौष्ठवम् ।
रामस्य च यथारूपं तस्येयमसितेक्षणा ॥ ४९॥

अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितम् ।
तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति ॥ ५०॥

दुष्करं कुरुते रामो य इमां मत्तकाशिनीम् ।
सीतां विना महाबाहुर्मुहूर्तमपि जीवति ॥ ५१॥

एवं सीतां तदा दृष्ट्वा हृष्टः पवनसम्भवः ।
जगाम मनसा रामं प्रशशंस च तं प्रभुम् ॥ ५२॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for

his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com